# किरातार्जुनीयम् (१मः सर्गः)

कृतप्रणामस्य महीं महीभूजे जितां सपत्नेन निवेदयिष्यतः।

न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।

**उत्सः** - महाकविभारविविरचितस्य किरातार्जुनीयमिति महाकाव्यस्य प्रथमसर्गे उपलभ्यते अयं श्लोकः।

**प्रसङ्गः** - दूतक्रीडायां राज्यं हारयित्वा युधिष्ठिरः द्वैतवने निवासकाले दुर्योधनस्य प्रजापालनकार्यं ज्ञातुं कमपि वनेचरं चररूपेण नियुक्तवान्। स चरेण सर्वं वृत्तान्तं ज्ञात्वा युधिष्ठिरस्य समीपे निवदनकाले कविः प्रस्तुतश्लोकः उक्तवान्।

**अन्वयसहितशब्दार्थः** - कृतप्रणामस्य (प्रणामपूर्वकस्य) सपत्नेन (शत्रुकर्तृकेन) जितां महीम् (पृथिवीम्) महीभूजे (नृपे) निवेदयिष्यतः (निवेदनकाले) तस्य (वनेचरस्य) मनः (चित्तम्) न विव्यथे (पिडीतवान्)। हि (यतः) हितैषिणः (शुभाकांक्षीजनाः) मृषा प्रियम् (प्रियमिथ्यावाक्यम्) वक्तुम् न इच्छन्ति।

**व्याख्या** - युधिष्ठिरः द्वैतवने निवासकाले दुर्योधनस्य प्रजापालनकार्यं ज्ञातुं यत् वनेचरं चररूपेण नियुक्तवान्, स चरः सर्वं वृत्तान्तं ज्ञात्वा युधिष्ठिरस्य समीपे आगम्य आदौ तस्मै प्रणामं विनिवेद्य ततः दुर्योधनस्य राज्यशासनमूलकानि वाक्यानि उक्तवान्। यानि वाक्यानि स उक्तवान् तत् सर्वं सत्यम् एव आसीत्। तत्र मिथ्या किमपि नास्ति। चरस्य एष धर्मः भवति स कदपि मिथ्यावाक्यं तस्य प्रभुम् उद्दिश्य न वदेत्। सदा सत्यमेव वदेत्। तत् सत्यं यदि अप्रियं भवति तदापि सत्यमेव वदेत्। प्रियमिथ्यावाक्यं कदापि मा वदेत्। मङ्गलकामिजनाः अप्रियमपि सत्यमेव वदन्ति। युधिष्ठिरस्य नियुक्तः चरः सत्यधर्माचारणकारी एव आसीत्। अतः दुर्योधनस्य राज्यशासनमूलकानि वाक्यानि युधिष्ठिराय निवदनसमये तस्य चरस्य मनः न व्याथितम् इति।

**छन्दोऽलंकारश्च** - अत्र वंशस्थविलम् इति छन्दः अर्थान्तरन्यासः इति अलंकारश्च।